# Vyasakritam Kailasa Mahimavarnanam

# વ્યાસકૃતં કૈલાસમહિમાવર્ણનમ્

## Document Information

Text title : Vyasakritam Kailasa Mahimavarnanam

File name : kailAsamahimAvarNanaMvyAsakRRitam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 24| 45-88 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# વ્યાસકૃતં કૈલાસમહિમાવર્ણનમ્

સ નૈવ તપસા પ્રાપ્યો ઘોરેણાપ્યમિતેન વા ।
નાન્યૈરપીતિ લોકેષુ કૈલાસઃ પરમો મતઃ ॥ ૧॥

ન દેવેષુ યથા દેવો મદન્યોઽપ્યધિકસ્તથા ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨॥

યથા ગોક્ષીરમધિકં ક્ષીરેષુ વિવિધેષ્વપિ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩॥

મધુરેષુ યથા શ્રેષ્ઠા મધુરા સિકશર્કરા ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૪॥

યથા ઘૃતેષુ સર્વેષુ ગોઘૃતં સુમનોહરમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૫॥

પરમાન્નં યથાન્નેષુ સર્વેષ્વપ્યધિકં શ્રુતમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૬॥

યથા તરુષુ સર્વેષુ શ્રેષ્ઠો બિલ્વતરુઃ શ્રુતઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૭॥

યથા ફલેષુ સર્વેષુ શ્રીફલસ્ય ફલં વરમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૮॥

યથા સર્વેષુ વસ્ત્રેષુ દુકૂલં ચિત્રિતં વરમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૯॥

ભૂષણેષુ યથા શ્રેષ્ઠં ભવ્યં રુદ્રાક્ષભૂષણમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૧૦॥

અઙ્ગરાગેષુ સર્વેષુ શ્રેષ્ઠા ભૂતિઃ શ્રુતિસ્તથા ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૧૧॥

યથા નરેષુ સર્વેષુ શઙ્કરઃ પુરુષોત્તમઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૧૨॥

યથા નારીષુ સર્વાસુ નારીરત્નં ગિરીન્દ્રજા ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૧૩॥

યથા તીર્થેષુ સર્વેષુ શિવલિઙ્ગપરમ્પરા । (શિવગઙ્ગા પરં વરા)
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૧૪॥

સરોવરેષુ સર્વેષુ યથા રુદ્રસરોવરમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૧૫॥

યથા પુરેષુ સર્વેષુ પુરં કાશીપુરં પરમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૧૬॥

યથા વાપીષુ સર્વાસુ જ્ઞાનવાપી મનોહરા ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૧૭॥

મુક્તિમણ્ટપમુત્કૃષ્ટં મણ્ટપેષુ યથા મતમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૧૮॥

યથા વૈશ્વેશ્વરં લિઙ્ગં લિઙ્ગેષુ શ્રેષ્ઠમુચ્યતે ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૧૯॥

યથા મૂર્તિષુ સર્વાસુ દક્ષિણામૂર્તિરુત્તમા ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨૦॥

યથા ગિરિષુ સર્વેષુ શ્રેષ્ઠો હિમગિરિઃ સ્મૃતઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨૧॥

યથા નદીષુ સર્વાસુ નર્મદા શર્મદા સદા ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨૨॥

યથા મુનિષુ સર્વેષુ શ્રેષ્ઠઃ કલશસમ્ભવઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨૩॥

યથા સર્વેષુ મન્ત્રેષુ શિવપઞ્ચાક્ષરઃ પરઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨૪॥

શિવપૂજાસાધનેષુ બિલ્વપત્રં યથા પરમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨૫॥

યથા વેદેષુ સર્વેષુ રુદ્રાધ્યાયઃ પરઃ સ્મૃતઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨૬॥

યથા સર્પેષુ સર્વેષુ સહસ્રફણિરુત્તમઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨૭॥

યથા ચતુષ્પદાં મધ્યે પ્રસિદ્ધો વૃષભો વરઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨૮॥

યથા વિદ્યાસુ સર્વાસુ શિવવિદ્યા વરા સ્મૃતા ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૨૯॥

યથા ભોજ્યેષુ સર્વેષુ શિવનૈવેદ્યમુત્તમમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩૦॥

યથા ગૃહેષુ સર્વેષુ શ્રેષ્ઠમન્તર્ગૃહં મતમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩૧॥

મન્દિરેષુ યથા શ્રેષ્ઠં રમ્યં શાઙ્કરમન્દિરમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩૨॥

ઉત્તમાઙ્ગં યથાઙ્ગેષુ શિવાનતિકિણાઙ્કિતમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩૩॥

કુમારેષુ યથા શ્રેષ્ઠઃ ષણ્મુખઃ શ્રુતિષુ શ્રુતઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩૪॥

લોહમધ્યે યથા શ્રેષ્ટં કાઞ્ચનં શૈલજાપ્રિયમ્ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩૫॥

બ્રાહ્મણેષુ યથા શ્રેષ્ઠઃ શામ્ભવો બ્રાહ્મણોત્તમઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩૬॥

યથા રત્નેષુ સર્વેષુ શ્રેષ્ઠચિન્તામણિઃ સ્મૃતઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩૭॥

યથા સર્વેષુ દેશેષુ શ્રેષ્ઠઃ સોઽયં સુધાકરઃ ।
તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩૮॥

પાવનેષુ યથા ભસ્મ શ્રુત્યુક્તં પાવનોત્તમમ્ ।

તથા સર્વેષુ દેશેષુ કૈલાસસ્ત્વાધકાધિકઃ ॥ ૩૯॥

કૈલાસતુલ્યઃ કુત્રાપિ વેદેષ્વપિ ન દૃશ્યતે ॥ ૪૦॥

તથાપ્યધિકમસ્તીતિ વક્તા પાપકુલાકુલઃ ।
સન્નિધિઃ સર્વદા યત્ર મમ તસ્માત્ કિમુત્તમઃ ॥ ૪૧॥

કૈલાસસન્નિધિર્નિત્યં તેનાસાવધિકઃ સ્મૃતઃ ।
વિચિત્રા રચનાસ્તત્ર વેદાન્તાગોચરા અપિ ॥ ૪૨॥

તતસ્તત્ર સુખં તાવત્ તાવદન્યત્ર કુત્ર વા ।
સર્વોત્તમઃ સ કૈલાસઃ તત્ર મે રમતે મનઃ ॥ ૪૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વ્યાસકૃતં કૈલાસમહિમાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૨૪। ૪૫-૮૮ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 24. 45-88 ..

Proofread by Ruma Dewan

*Vyasakritam Kailasa Mahimavarnanam*
pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*